# 29 - एकोनत्रिंश दशकम्

## मोहिनि अवतारम्

उद्गच्छतस् तव करात् अमृतं हरत्सु
दैत्येषु ता नशरणान् अनुनीय देवान् ।
सद्यस् तिरोदधिथ देव भवत् प्रभावात्
उद्यत् स्वयूथ्य कलहा दितिजा बभूवुः ॥ ॥29-1॥

श्यामां रुचाऽपि वयसाऽपि तनुं तदानीं
प्राप्तोऽसि तुङ्ग कुच मण्डल भंगुरां त्वम् ।
पीयूष कुम्भ कलहं परिमुच्य सर्वे
तृष्णा कुलाः प्रतिययुस् त्वदुरोज कुम्भे ॥ ॥29-2॥

का त्वं मृगाक्षि विभजस्व सुधा मिमा मिति
आरूढ राग विवशान् अभियाच तोऽमून् ।
विश्वस्यते मयि कथं कुलटाऽस्मि दैत्याः
इत्यालपन् नपि सुविश्वसिता नतानीः ॥ ॥29-3॥

मोदात् सुधा कलश मेषु ददत्सु सा त्वं
दुश्चेष्टितं मम सहध्व मिति ब्रुवाणा ।
पङ्क्ति प्रभेद विनिवेशित देव दैत्या
लीला विलास गतिभिस् समदास् सुधां ताम् ॥ ॥29-4॥

अस्मास्वियं प्रणयिणी त्यसुरेषु तेषु
जोषं स्थितेष्वथ समाप्य सुधां सुरेषु ।
त्वं भक्त लोक वशगो निज रूप मेत्य
स्वर्भानु मर्ध परिपीत सुधं व्यलावीः ॥ ॥29-5॥

त्वत्तस् सुधा हरण योग्य फलं परेषु
दत्वा गते त्वयि सुरैः खलु ते व्यगृह्णन् ।
घोरेऽथ मूर्छति रणे बलिदैत्य माया
व्यामोहिते सुरगणे त्वमिहा विरासीः ॥ ॥29-6॥

त्वं कालनेमि मथ मालि मुखाञ्जघन्थ
शक्रो जघान बलि जम्भ वलान् सपाकान् ।
शुष्कार्द्र दुष्कर वधे नमुचौ च लूने
फेनेन नारद गिरा न्यरुणो रणं त्वं ॥ ॥29-7॥

योषा वपुर् दनुज मोहन माहितं ते
श्रुत्वा विलोकन कुतूहलवान् महेशः ।
भूतैस् समं गिरिजया च गतः पदं ते
स्तुत्वाऽब्रवी दभिमतं त्वमथो तिरोधाः ॥ ॥29-8॥

आराम सीमनि च कन्दुक घात लीला
लोलायमान नयनां कमनीं मनोज्ञाम् ।
त्वामेष वीक्ष्य विगलत् वसनां मनोभू
वेगादनङ्ग रिपु रङ्ग समालिलिङ्ग ॥ ॥29-9॥

भूयोऽपि विद्रुतवती मुप धाव्य देवः
वीर्य प्रमोक्ष विकसत् परमार्थ बोधः ।
त्वन् मानितस् तव महत्त्व मुवाच देव्यै
तत्-तादृशस् त्व मव वात निकेतनाथ ॥ ॥29-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥